# Palashamahima Stotram

# પલાશમહિમાસ્તોત્રમ્

## Document Information

Text title : Palashamahima Stotram

File name : palAshamahimAstotram.itx

Category : deities_misc, skandapurANa, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 248/1-15||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 23, 2025

*sanskritdocuments.org*

# પલાશમહિમાસ્તોત્રમ્

વાણ્યુવાચ ।
પલાશો હરિરૂપેણ સેવ્યતે હિ પુરાવિદૈઃ ।
બહુભિર્હ્યુપચારૈસ્તુ બ્રહ્મવૃક્ષસ્ય સેવનમ્ ॥ ૧॥

સર્વકામપ્રદં પ્રોક્તં મહાપાતકનાશનમ્ ।
ત્રીણિ પત્રાણિ પાલાશે મધ્યમં વિષ્ણુશાપિતમ્ ॥ ૨॥

વામે બ્રહ્મા દક્ષિણે ચ હર એકઃ પ્રકીર્તિતઃ ।
પલાશપાત્રે યો ભુઙ્ક્તે નિત્યમેવ નરોત્તમઃ ॥ ૩॥

અશ્વમેધસહસ્રસ્ય ફલં પ્રાપ્નોત્યસંશયમ્ ।
ચાતુર્માસ્યે વિશેષેણ ભોક્તુર્મોક્ષપ્રદં ભવેત્ ॥ ૪॥

પયસા વાથ દુગ્ધેન રવિવારેઽનિશં યદિ ।
ચાતુર્માસ્યેઽર્ચિતો યૈસ્તુ તે યાન્તિ પરમં પદમ્ ॥ ૫॥

દૃશ્યતે યદિ પાલાશઃ પ્રાતરુત્થાય માનવૈઃ ।
નરકાનાશુ નિર્ધૂય ગમ્યતે પરમં પદમ્ ॥ ૬॥

પાલાશઃ સર્વદેવાનામાધારો ધર્મસાધનમ્ ।
યત્ર લોભસ્તુ તસ્ય સ્યાત્તત્ર પૂજ્યો મહાતરુઃ ॥ ૭॥

યથા સર્વેષુ વર્ણેષુ વિપ્રો મુખ્યતમો ભવેત્ ।
મધ્યે સર્વતરૂણાં ચ બ્રહ્મવૃક્ષો મહોત્તમઃ ॥ ૮॥

યસ્ય મૂલે હરો નિત્યં સ્કન્ધે શૂલધરઃસ્વયમ્ ।
શાખાસુ ભગવાન્ રુદ્રઃ પુષ્પેષુ ત્રિપુરાન્તકઃ ॥ ૯॥

શિવઃ પત્રેષુ વસતિ ફલે ગણપતિસ્તથા ।
ગઙ્ગાપતિસ્ત્વચાયાં તુ મજ્જાયાં ભગવાન્ભવઃ ॥ ૧૦॥

ઈશ્વરસ્તુ પ્રશાખાસુ સર્વોઽયં હરવલ્લભઃ ।

હરઃ કર્પૂરધવલો યથાવદ્વર્ણિતઃ સદા ॥ ૧૧॥

તથા હ્યયં બ્રહ્મરૂપઃ સિતવર્ણો મહાભગઃ ।
ચિન્તિતો રિપુનાશાય પાપસંશોષણાય ચ ॥ ૧૨॥

મનોરથપ્રદાનાય જાયતે નાત્ર સંશયઃ ।
ગુરુવારે સમાયાતે ચાતુર્માસ્યે તથૈવ ચ ॥ ૧૩॥

પૂજિતશ્ચ સ્તુતો ધ્યાતઃ સર્વદુઃખવિનાશકઃ ॥ ૧૪॥

દેવસ્તુત્યો દેવબીજં પરં યન્મૂર્તં બ્રહ્મ બ્રહ્મવૃક્ષત્વમાપ્તમ્ ।
નિત્યં સેવ્યઃ શ્રદ્ધયા સ્થાણુરૂપશ્ચાતુર્માસ્યે સેવિતઃ પાપહા સ્યાત્ ॥ ૧૫॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે અષ્ટચત્વારિંશાધિકદ્વિશતતમાધ્યાયાન્તર્ગતં
પલાશમહિમાસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૪૮/૧-૧૫॥

skandapurANa . nAgarakhaNDa . adhyAya 248/1-15..

Proofread by PSA Easwaran

*Palashamahima Stotram*

pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*